नं. ५०२६ त. ५०३४ पर्यन्तम्

क्र. त. देवी माहात्म्यं

ज. अलं. भवानी सहस्रनाम. अष्ट पुस्तकानि

पत्र. २२ (सर्वेषां) ——— सं.

विषय: भक्ति: पुराण माहात्म्यं तन्त्रं

✓

क देवीमाहात्म्य द्वितीयतृतीय २
रहस्यकम्
मार्कण्डेयपुराणे

ख देवीसूक्तं रुद्रयामले ३

ग लघुस्तवः पंचस्तव्याम् १

घ इन्द्राक्षीस्तोत्रम् १

ङ. महिम्नस्तोत्रम् ३

च सौन्दर्यलहरी ४

छ रामहृदयम् अध्यात्मरामायणे १

ज भवानीनामसहस्रम् रुद्रयामले १५

५०२७ —— पत्र

गुणातामसादेवीसात्विकीयात्रिधोदिता साशर्वाचंडिकादुर्गाभद्राभगवतीन्नृप १ योगनिद्राहरेरुक्तामहा
२ काली तमोगुणा मधुकैटभनाशार्थं यां तुष्टावांबुजासनः २ दशवक्त्रा दशभुजा दशपा
दांजनप्रभा विशालया राजमाना त्रिंशल्लोचनमालया स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप ३
सा रूपसौभाग्यकांतीनां सा प्रतिष्ठा महाश्रियः ४ खड्गबाणगदाशूलशंखचक्रकपालभृत्
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ५ एषा सा वैष्णवी माया महाकाली दुरत्यया आराधिता व
शीकुर्यात्पूजाकर्तुश्चराचरं ६ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा त्रिगुणा सा महालक्ष्मीः सा
क्षान्महिषमर्दिनी ७ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला रक्तमध्या रक्तपादा नीलजंघो
रुरुन्मदा ८ सुचित्रजघना चित्रमाल्यांबरविभूषणा चित्रानुलेपना कांतिरूपसौभाग्यशा
लिनी ९ अष्टादशभुजा पूज्या सा सहस्रभुजा सती आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्र
मात् १० अक्षमाला च कमलं बाणोसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाश
कः ११ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुं अलंकृतभुजामेभिरायुधैः कमलासनां १२
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् १३ गौरी
देहात्समुद्भूता या सत्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी १४ दधौ चाष्टभु
जा बाणमुसले शूलचक्रभृत् शंखं घंटां लांगलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या
सर्वज्ञत्वं प्रयच्छति निशुंभमथनी देवी शुंभासुरनिबर्हिणी १६ इत्युक्तानि स्वरूपाणि मूर्तीनां त
व पार्थिव उपासनं जगन्मातुः पृथगासां निशामय १७ महालक्ष्मीर्यदा पूज्या महाकाली सरस्व
ती दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् विरिंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे वामे ल

श्री

दु॰ कृष्णा हृषीकेशः पुरतो देवत्रयं ॥ अष्टादशभुजा मध्ये वामे चास्या दशानना दक्षिणेऽष्टभुजा लक्ष्मीर्मह
द्या ११ ल्लतीति यथाक्रमं १९ पृथगेव दलतः पूज्या स्थिता गणेश्वरैर्वृताः अष्टादशभुजा चैषा यदा पूज्या नराधिप २१
दशाननाचाष्टभुजा दक्षिणोत्तरयोस्तथा दशाननायदा पूज्या दक्षिणोत्तरयोस्तथा २२ कालमृत्यू
च संपूज्यौ सर्वारिष्टप्रशान्तये यदा चाष्टभुजा पूज्या शुम्भासुरनिवर्हिणी २३ दशाननाचाष्टभु
जा शुम्भासुरनिवर्हिणी नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ २४ नमो देव्या इति स्तोत्रैर्महा
लक्ष्मीं समर्चयेत् अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः २५ अष्टादशभुजा चैषा पूज्या महिष
मर्दिनी महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती २६ ईश्वरी पुण्यपापानां सर्वलोकमहेश्व
री महिषान्तकरी येन पूजिता स जगत्प्रभुः २७ पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलां अर्घ्या
दिभिरलंकारैर्गन्धपुष्पैस्तथाक्षतैः २८ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यैः समन्वितैः रुधिराक्तेन
बलिना मांसेन सुरया नृप २९ प्रणामाचमनीयेन चन्दनेन सुगन्धिना सकर्पूरैश्च ताम्बूलैर्भक्ति
भावसमन्वितैः २९ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरं पूजयेन्महिषं येन प्राप्तं सायु
ज्यमीशया ३० दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरं वाहनं पूजयेद्देव्या धृतं येन चराच
रं ३१ ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः अथवा नरस्तवन्धीमान्नस्यामेका प्रमानसु ३२
एकेन वा मध्यमेन नैकेनेतरयोरिह चरितार्धं न च जपेज्जपंश्छिद्रमवाप्नुयात् ३३ स्तोत्रमन्त्रैः
स्तुवीतैमां यदि वा जगदम्बिकां प्रदक्षिणनमस्कारान्कृत्वा मूर्ध्नि कृताञ्जलिः ३४ क्षमापयेज्ज
गद्धात्रीं मुहुर्मुहुरतन्द्रितः प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा जुहुयात्स्तोत्र
मन्त्रैर्वा चण्डिकायै शुभं हविः भूयो नामपदैर्देवीं पूजयित्वा समाहितः ३५ प्रयतः प्रा
ञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि सुचिरं भावयेद्देवीं चण्डिकां तन्मयो भवेत् ३६

एवंयःपूजयेद्भक्त्याप्रत्यहंपरमेश्वरीम भुक्त्वाभोगान्यथाकामान्देवीसायुज्यमाप्नुयात् ३८ योन
पूजयतेनित्यंचण्डिकांभक्तवत्सला भस्मीकृत्यास्यपुण्यानिनिर्दहेत्परमेश्वरी ३९ तस्मात्पू
जयभूपालसर्वलोकमहेश्वरी यथोक्तेनविधानेनचण्डिकांसुखमाप्स्यसि ४० इतिश्रीमा
र्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येप्रकृतिकंरहस्यंनामद्वितीयं २ ऋषिरुवाच
नंदाभगवतीनामयाभविष्यतिनंदजा सास्तुतापूजितानित्यंवशीकुर्याज्जगत्त्रयं १ कनको
त्तमकान्तिःसासुकान्तिकनकाम्बरा देवीकनकवर्णाभाकनकोत्तमभूषणा २ कमलाङ्कु
शपाशाब्जैरलंकृतचतुर्भुजा इन्दिराकमलालक्ष्मीःसाश्रीरुक्माम्बुजासना ३ यारक्त
दंतिकानामदेवीप्रोक्तामयानघ तस्याःस्वरूपंवक्ष्यामिशृणुसर्वभयापहं यत्कृत्वा
सर्वपापेभ्योमुच्यतेनात्रसंशयः रक्ताम्बरारक्तवर्णारक्तसर्वाङ्गभूषणा ५ रक्तायुधार
क्तनेत्रारक्तकेशातिभीषणा रक्ततीक्ष्णनखारक्तदशनारक्तदन्तिका ६ पतिंनारी
वानुरक्तादेवीभक्तंभजेज्जनं वसुधेवविशालासासुमेरुयुगलस्तनी ७ दीर्घौलं
बावतिस्थूलौतावतीवमनोरमौ कर्कशावतिकान्तौतौसर्वानंदपयोनिधी ८
भक्तान्संपाययेद्देवीसर्वकामदुघौस्तनौ खड्गंपात्रंचमुसलंलाङ्गलंचबिभर्तिसा ९
आख्यातारक्तचामुण्डादेवीयोगेश्वरीतिच अनयाव्याप्तमखिलंजगत्स्थावर
जंगमं १० इमांयःपूजयेद्भक्त्यासव्याप्नोतिचराचरं अधीतेयइमंनित्यंरक्त
दंत्यावपुस्तवं ॥ तंसापरिचरेद्देवीपतिंप्रियमिवाङ्गना शाकंभरीनीलव

णीनीलोत्पलविलोचना १२ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी सुकर्कशसमोत्तुंगवृत्तपीनघ
नस्तनी १३ मुष्टिंशिलीमुखापूर्णंकमलंकमलालया पुष्पपल्लवमूलादिफलाढ्यंशाकसंचय १४
काम्यानंतरसैर्युक्तंक्षुत्तृण्मृत्युजरापहं कार्मुकंचस्फुरत्कांतिविभ्रतीपरमेश्वरी १५ शाकंभ
रीशताक्षीसासैवदुर्गाप्रकीर्तिता उमागौरीसतीचंडीकालिकासाचपार्वती १६ विशोकादु
ष्टदमनीशमनीदुरितापदः शाकंभरीस्तुवंध्यायंजपन्संपूजयन्नमन् १७ अक्षय्यमश्नुतेशी
घ्रमन्नपानरसान्बहून् भीमापिनीलवर्णासादंष्ट्रादशनभासुरा विशाललोचनानारी
पीनोन्नतपयोधरान् चंद्रहासंचडमरुशिरःपात्रंचविभ्रती १८ एकवीराकालरात्रिःसैवो
क्ताकामदास्तुता तेजोमंडलदुर्दर्षाभ्रामरीचित्रकांतिभृत् २० चित्रानुलेपनादेवीचित्रा
भरणभूषिता चित्रभ्रमरपाणिःसामहामारीतिगीयते २१ मेधाप्रज्ञातथाश्रद्धाधारणा
कांतिरेवच भवंतिस्तुवतोनित्यंवांछिकामानवस्यच २२ इतितेमूर्तयोदेव्याव्याख्याताव
सुधाधिप जगन्मातुश्चंडिकायाःकीर्तिताःकामधेनवः २३ इदंरहस्यपरमनवाच्यंकस्य
चित्वया व्याख्यानंदिव्यमूर्तीनामभीष्टफलदायकं २४ देवीनांचततःसर्वगुह्याद्गुह्यतर
परं इदंदेव्याश्चमाहात्म्यमाख्यातंतवपार्थिव २५ इतिश्रीमार्कंडेयपुराणेसावर्णिकेम
न्वंतरेदेवीमाहात्म्येरहस्यंसमाप्तम् ॐमार्कंडेयपुराणोक्तंदेवीमाहात्म्यमुत्तमं यःपठेद्भ
क्त्याकथातस्यमुक्तिर्नसंशयः १ अज्ञानाद्विस्मृतेर्भ्रांत्यान्यूनमधिकंकृतं विपरीतंतुतत्सर्वं
क्षमस्वपरमेश्वरी २ यदक्षरपदभ्रष्टंस्वरव्यंजनवर्जितं तत्सर्वंक्षम्यतांदेविप्रसीदपरमेश्वरि ३
यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिप्रसादात्त्वत्परमेश्वरि ४
मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि यत्स्तुतासिमयादेविनरस्यात्त्वंवरदाभव ५ आवा

दनं च सं जो च विन्ध्याद्रौ गुह्यं जपं तथा विसर्जनं न जानामि चंडिके त्वं क्षमस्व मे कामेश्वरी जगन्माता सच्चिदानंद
विग्रहा गृहाणार्चामिमां सर्वां प्रसीद करुणानिधे गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिः
भवतु मे देवि त्वत्प्रसादान्महेश्वरि १ प्रात्यक्षमयेस्त्वं देवि त्रिपुरसुंदरि यथाशक्तिजपाः पूजा
गृहाण परमेश्वरि २ समाप्तश्चायं स्तुतिः ॥ ॐ नजोवाच मुने कथय सर्वज्ञ भूयः किंचिदनुत्तमं
तत्त्वमेनस्य सर्वस्य येन सिद्धिरवाप्यते ऋषिरुवाच भूयः शृणु महाभाग देवीमाहात्म्यमुत्तमं विना
येन स्तवस्यास्य निर्जीवो नरः पटन् १ दृष्ट्वा प्रभुभिर्विनिहितं दारुणं देवकंटकं समाजग्मुः परमानंदत
स्ताविस्मिताः सुरेश्वराः ३ देवीस्तुतिं समाधाय गगने तालसंयुताः आज्ञामादाय देवेशं कर्तुं ध्यानमादरात्
४ बद्धांजलिः पुटः साक्षात् तुष्टुवुः क्रमशः शिवां लोकानां च हितार्थाय देवीसूक्तानि पार्थिव ५
ब्रह्मा सरस्वतीसूक्तं लक्ष्मीसूक्तं जनार्दनः सूक्तं तथा महाकाल्याः शंकरः स्वयमब्रवीत् ६ ब्रह्मो
वाच अजापुराणीं ममराशसनातनीं चतुर्भुजां पुस्तकमक्षधारिणीं वराभयाभ्यामनुशोभितां तां
नमामि त्वां जाड्यजराविनाशिनीं ७ सरस्वतीं त्वां मनुतोमि वाचं वाचा प्रसादं सवराधि तुष्टा १
मुक्तामणिद्योतितकंबुकंठां नाम्यैकलभ्यां परमां पवित्रां ८ श्रीकंठशक्तित्रयशोभमानां दशार
तूर्यैण कृतानुरूपां पंचारवासां भजतां गृहाणां सरस्वतीं त्वां प्रणमामि देवी ९ कलाढ्यमवाम
धिकोटिनाशं विहारयंत्रं त्रिभिरेकशोभां स्वक्षकवदानां स्फटिकानुरूपां सरस्वतीं त्वां प्रणमा
मि मातः वाक्कायकार्यैः परमैः पवित्रैः रमा सुमांगी वरदाभदंहैः बीजैरसीभिः कथिबीजयुक्तां
क्लीं युग्मतिरश्चैरिति मंत्रराजा ११ एकेन चैकेन च युग्मकेन द्वाभ्यामथैकेन तथैव वशी पं
कणं गक्षिभिः परमोन मोयं निहंति पापानि च साधकानां १२ हठेन वैष्ण्वलयाच सरस्वा वि

स्त.
२३

धातुपद्मावनये व वा चांश्री केनवत्ताकिलयो भया चन्या से रमीभिः पतितो पि प्रं भु ४३ दृष्वेणा हे मातसक
लार्थसिद्धिः तु किं पुर्के वा गपि सिद्धिम्र्छेत् मत्वायस्तवेणा रमानिवासाः स्तपास्तसेनापि च वेद
सिद्धिः १४ न चावदन्ते मक्षिमानं वदीभिस्त्वत्तिप्रष्यिते लोकमध्ये जानंति किं बुद्बुदा भूमिनो येतुत्वा
वयं ब्रह्महरीशमुख्याः १५ तथैव वाचाव यसं वदामो विश्वाम प्रात्या मध्ये वा च जीवा पश्वश्चमरुत्वादि
मा तमरुत् शिरस्त्वपास्मि साक्षात्त्वविसप्तुताये १६ स्वादंचिदामस्तव शक्तियोगाद्दृस्तीमहितत्वश
त्या महेशा मच्चाम हेतवशात्केप्रभावाद्यानंदपुत्रात्त वसन्निवेशात् १७ आत्मा [illegible] मनस्त्वं
त्वमेवासि देहस्त्वमेववैवेचेंद्रियपंचतत्वा त्वमेववैविषयः सप्तमुख्याः परावरेषापरतत्त्वमेव १८
रविश्चते चंद्रमाश्चते ताराश्चते भूश्चते नलं च ते तेजश्चते वायुश्चते शाणश्चते पानश्चते व्यानश्चते उदान
श्चते समानश्चते नागश्चते कूर्मश्चते कृकलश्चते देवदत्तश्चते धनंजयश्चते भूतात्मा च ते ज्ञानात्मा
च ते सर्वात्मा च ते मम चित त्वय्येव विनिविष्टवंतो १९ यदा न चाउभ्भुवनानि जीवा नाहं न विश्वं
विपर्यतेषां न चक्षुरो नापि सदा पि वश्च त्वमेव चासीदिति चाभविष्या २० कालस्त्वमेवासि
जगत्त्रयाणां स्वभाववीर्यादिकं च त्वमेव त्वमेव विश्वं परमात्मशक्तिं नमामि ते पादपीठं सरस्व
ति २१ त्वं वेदवाणी निखिलश्च वेदस्त्वं शब्दशक्तिश्च तथार्थशक्तिः त्वं ब्रह्मविद्याधिपरावरे
शि त्वं ब्रह्मशक्तिं शरणं प्रपद्ये सूक्तं वेदं स्तव भंग सरस्वति प्रातस्त्व मध्याह्नकाले च सायं पठंति
ये श्रद्धया सवि[illegible]तास्ते भोगोकमोक्षे सहसा लभंते २३ नतें कुयो निंदारिद्रतां वाध्यात्मा
दितापं न च संलभंते तएव धन्याश्च तएव पूज्या सर्वत्र मान्या भवती हतेषां २४ पदं पुराणं त्वि
रंजसुधामयं तत्त्वभूतं जगतां त्रयाणां तेषां प्रभवंति प्रकट प्रभावास्त्वां सर्वयोनिं शरणं प्रपद्ये २५

ऋषिरुवाच स्तुतानयावेदवान्या सर्वसारस्वरूपया प्रसन्नादेवदेवीशेमहार्हसरस्वती २६
आविर्भूतामहादेवीब्रह्मतोषैककारिणी उवाच च चनद्दिव्यंब्रह्माणंदप्रदायकं २७ श्रीदेव्यु
वाच स्तवेनानयावत्सब्रह्मन्सन्तोषसमन्विता स्तुतास्मिप्रियतादेववरसन्तोषकारक २८
ब्रह्मोवाच तदहृदयेमनोदेवीदृढंभवतुसर्वदा एषएववरःसाक्षाद्दुतमाम्प्रीयतेमया ३० स्व
त्तत्के चापिदेवि श्रीतेजोदिव्यंविधीयतां येनकार्याणिसिद्ध्यन्ति साधकानांमहात्मितां
३१ श्रीदेव्युवाच सर्वदातेमनोदेवीकुलधर्मेस्तुशक्तिते दृढंभवतुसत्कंच प्रसादान्मेपर
नपः ३२ सर्वसिद्धिप्रदंचास्तुपरमानन्ददायकं विनात्तत्कंपठेद्यस्तुस्तोत्रंसप्तशतीतिच
३३ मातङ्गमीसविलेयानरकावासतत्परः ममैवाज्ञापराङ्हेनब्रह्मब्रह्मागतिंव्रजेत ३४
ऋषिरुवाच एवमुक्त्वावचोदेवीलक्ष्मीमासीन्नृपोत्तम इतितस्सस्तुतीस्तत्र ऋत्वाञ्जलिसमाधा
यहरिः प्रोवाचविश्वकृत्त हरिरुवाच परावरांगजगदादिभूतांमहासलक्ष्मीपराणीधराण
मनादिमाद्यंपरमार्थरूपांत्वाविश्वयोनिंशरणंप्रपद्ये ३५ सकामनेकोविविधांसुकार्याणि
कारिणीसदसद्रूपिणींच रूपासहस्रांचशिवांशिवप्रदांत्वांविश्वयोनिंशरणंप्रपद्ये ३६
सर्वाश्रयांसर्वजगन्निवासांश्रीमन्महालक्ष्मिमनादिदेवांशक्तिस्वरूपांचशिवस्वरूपां
त्वांविश्वयोनिंशरणंप्रपद्ये ३७ कामाक्षिपीठेमधिकेसम्भूतांक्लींरूपिणींकपिवीजप्रभा
वां कन्याष्टवीजांपरमार्थसंज्ञांत्वांविश्वयोनिंशरणंप्रपद्ये ३८ वैश्वानरस्त्रीसहितेनदे
वीश्रीमन्त्रराजेनविराजमानां सर्वार्थधात्रींपरमांपवित्रांत्वांविश्वयोनिंशरणंप्रपद्ये ३९ त्रि
कोणपंचारयुगप्रभावांषट्कोणसिंश्राद्विदशारयुक्तां अष्टारचक्रादिनिवासभूतांत्वां
विश्वयोनिंशरणंप्रपद्ये ४० पुनर्दशारद्विनयेनयुक्तांपंचारकोणांकितभूगृहांच

ल
१४

यज्ञाधिवासामपि यं च रूपां तां विश्वयोनिं प्रणतोऽस्मि याचे ॥४१॥ सम्भाविता सर्वदन्याः समस्ता सर्वस्य रूपा
मपि सर्वसंस्था सर्वान्तरन्या सवपुः प्रतिष्ठा तां विश्वयोनिं प्रणतोऽस्मि याचे ॥४२॥ सृष्टिस्थितिप्रलय
रूपप्रवीजं त्या संविधायं यज्जगतीयं तां तामेव राजेन्द्र निपृष्ट्य पादौ विधाय देवं स्व शेषा मालभन्ते
॥४३॥ प्रसन्नयन्त्रविधिना महेशि सम्पाः समस्ता परमस्तु भाग्याः जयन्ति ये त्वां विविधार्थ्य दाश्री
त एव धन्याः कुलमार्गनिष्ठाः ॥४४॥ जानन्ति के पापाश्च वस्तु रूपां ब्रह्मादिगीतेमहिमामहेशि
केचिन्महान्तो निजधर्मलाभाज्ज्ञानन्ति देवपरं सुधाम ॥४५॥ विधाय कुं डं विधिना स्थलं वा हो
मं विधिनोमसफलं पङ्कजं वने त्वन्नो घराणां ज्ञायते भाग्यमात्रं जे वासुदेवेश्वपियो न गम्य ॥४६॥ पुं
नाः स्तुति प्रपन्नो विध्वसारास्ते चेतु दा रैः कुलयोगयुक्ताः त एव धन्याः परमार्थभाजो भो
गस्य भाजश्च करे स्थितेषां ॥४७॥ ऋषिरुवाच इति प्रीस्तुतया देवी महालक्ष्मीर्ददर्श सः
चतुर्भुजा विनयनाम हिषासुरघातिनी ॥४८॥ प्रसन्नाँ महालक्ष्मी प्रसन्नात्मनि गौरवान् उवाच
स्मितपूर्वाभाष्य नारायणमजं प्रभुम् ॥४९॥ श्रीदेव्युवाच वरं वरय देवेशि नारायण सनातन रा
सामृतया भिदानव्यतवस्तुत्या वशीकृता ॥५०॥ नारायण उवाच माता परमकारुण्य महालं
क्ष्मिवरप्रदे कुलाचारमतिर्मेस्तु हृदये स्तु तव त्रिवे ॥५१॥ त्वत्स्तुतं च सफलं तव स्तुतिः प्रीतिकार
णं श्रीदेव्युवाच वरमेतन्महाभाग नारायण सनातन ॥५२॥ स्तुत्यनेन तद्दिनाय स्तुप ठेत्स मश
न्तीनराः सयाति च महाघोरं नरकं दारुणं किल ॥५३॥ लिप्यते परमशापमम कोपविचूर्णितः
लक्ष्मीस्तुतं विना सम मातीस्ता च निषिध्यते ॥५४॥ ऋषिरुवाच एवमुक्त्वा वचो देवी तूष्णीं भ
वगता नृप इति महालक्ष्मी स्तुतं ततोऽञ्जलिं समाधाय शिवो वाचमुदायुतः ॥५५॥ तु
ष्टाव वाग्भिर्दिव्याभिर्महाकालीं महेश्वरः वेदवाणीसमन्वाभिर्लोकानां हितकाम्यया

वै

५६ शिव उवाच शिवां मनिं हां त्रिविधप्रभावां कालीं करालां मालिनीं विश्वबंध्यां कपालखे।
होगधसन्नमुंडमालाविभूषणां मृगचर्मशोभा ५७ सप्तक्रमासां च शिवासनस्थां विभीषणां
भीषयंतीसुचीलन रक्तप्रियां मांसमदाविघूर्णां कालीं शरणं प्रपद्ये व्रजामि ५८ सघोर
बीजं च कपीश्च स्वचिंतामणिः कुब्जिक कीमह्ष विद्या च विद्या पुनका मराजं कामः क।
लाकामिनीकामराजं ५९ वक्रेवधमंत्रराजो यमीशे विष्णुपुनातीश्वरदे विवदे मंत्रेणचा
नेनसिध्यतिवास्तुस्तसिहृयः सर्वजगाद्विदोस ६० पंचास्तुम्भवत्रिकोणपुरसंपुतनस्थपंचा।
स्युतेनवद्व कलाप्रकोष्टकिलभूगृहरूचयंत्र्यक्षरंनेचपदाब्जवासं ६१ सप्तजयंत्रतवविष्ण।
नायकेनिःपापिनःसहसासंभवंति येसाधकास्तवमार्गानुसारिणः कुलानुष्टस्याः परमाप
चित्राः ६२ तेसिद्धिम्स्वच्चयशेनानुगम्यान्नृणांवशीकृत्य गृह्णंनभूपासमस्तमंत्रेणाविधायचा
गान्यासादिवभक्तिस्तुभावयुक्तः ६३ तेकिंकरीकृत्य गृह्णंतिदेवा शोचेजगत्येवविभूति
युक्ते वदामि नान्यं न स्पृशामि चान्यं न णामि नाना न विचिंतयामि स्मरामि नान्यं न भजामि।
चीन्यध्यायामि नान्यं न वितर्कयामि गच्छामि नान्यत वपादमंत्रात्वाद्विप्रयोनिश रसाप्र
पदे ६४ येषां न दैवं तव मित्रा सिद्देवीनाराधयंती रूचये ऊर्ध्वहृयः श्रद्धनमपदिष्ठाजितिसदाने
मादपूर्णं तेऽनात्मनो ६५ ऋषिरुवाच इतिवाक्यसमाकर्ण्य परमामृतसंमितं प्रसन्नभक्ता
कालीप्रियतामीप्सितोवरः इत्युवाच विशालाक्षी शंभोरानंददायिनी प्रसन्नापरमाज्ञा
दसंयुताशिवभाषणात् ६६ श्रीदेव्युवाच प्रियतां मनसोभीष्टो वरोजगतिदुर्लभः द
स्याभिरायाभिदास्त्वं तवस्तुत्या वशीकृता ६७ श्रीशिव उवाच कुलाचारेणातदेविम

ते

सू ५८

निर्मलं कदाचन शिथिलादेव देवेशि सूक्तं च सफलं न च २० श्रीदेव्युवाच एवमस्तीति चोक्ता हि
निःशेषा देवाः सनातनाः अतर्हि मायुपरमाए कस्मिन्नास्थिता भवत २१ अथ तान्स्तुवतो देव्यास्त्वो
वाच वचनं मु संतोषयन्तीच मुकुलीकान्तु ग्रहणं तत्परा ममो ध्रुवमीति संयुक्ता ब्रह्मविष्णुम
हेश्वराः देवीसूक्तं परं ध्यायभ विष्यति वरार्थदं २३ देवीसूक्तं विना देवा ये च समर्च यतीन रा
श्रोष्यन्ति च पठिष्यन्ति तेषां शापः पदे पदे २४ देवीसूक्तं विना पाठो ह्यस्य एवे वोदनं यथा
स्तोत्रोद्धारेण वर्जेन सर्वं स्तोत्रमभूदिदं देवा ऊचुः मातासम्प्रश्नेती स्तोत्रफलस्तुतिमि
होच्यतां यासमाकएणजीवानां विश्वासो जायते भृशं २६ ऋषिरुवाच इतिवाक्यसमा
कर्ण्य ब्रह्मविष्णुशिवादिनं फलस्तुतिमेषा वाच स्तोत्रस्यास्य महात्मते २७ इति
श्रीरुद्रयामले तन्त्रे देवीमाहात्म्ये सप्तशतिकाया देवीसूक्तवर्णनं नाम समाप्तः ॥
ॐ नमः त्रिपुरसुन्दर्यै ॥ ॐ ऐं ह्रसैव प्राणसनत्यद धनी मध्ये ललाटश्च भाष्यै क्लींकातिमनु
ज्ञगोरिव शिरः स्मानन्दनी सर्वतः एषा सौत्रिपुरा हृदि स्फुरति विधो सांप्रेगाः सदा हृस्थिता
ह्रीं यानः सकसा पदैस्त्रिभिरत्यज्योति मयी वाङ्मयी १ यामात्रा त्रिपुरी लतान्तुलसन
तुस्थिति साधिनी वीग्वीजे पुण्यमे स्थिता तत्व सदा नामन्नमहीने वयं शक्तिः कुण्डलि
नीति विश्व जननी व्यापारबद्धोद्यमा ज्ञात्वेत्यं न पुनः स्पृशन्ति जननीगर्भेऽर्भका मनवः २
दृष्ट्वा सम्भ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं येनाकूतवशाद पीह वरदं बिन्दुं विना
प्यक्षरं तस्यापि ध्रुवमेव देवि तरसा जाने तवानुग्रहे वाचः सूक्तिसुधारसद्रवमुचो
निर्यान्ति वक्त्राम्बुजात् ३ यन्नित्ये नवकामराजमपरं मन्त्राक्षरं निष्कलं तन्सारस्वत

भिस्यैवैतिविरलः कश्चिद्बुधस्त्वेद्भुवि ग्राव्णोनुप्रतिपर्वसत्तनयमोयत्कीर्तयंते द्विजाः प्रारंभेपुरा
वासदब्जलयिनी नित्योज्ज्वलंतिस्फुटं ४ यत्नेयावचसापि हृन्निकरणे दृष्टप्रभावावुधैस्त्वातीयतद
हं नमामिमनसा त्वद्बीजमिंदुप्रभं भ्रस्तैवोपिसरस्वतीमनगतो जाड्याभुविछिनये गोधाहृ
गिरिवर्तने स्तुनियंतयोगंविनासिद्धिदः ५ एकैकं तवदेविबीजमनघं सव्यंजनाव्यंजनं कूटं
स्थयदिवा दृष्टश्च मगनंयद्धास्यितं वुद्धमात यंयंवा ममपेक्ष्ययेन विधिनाकेनापिवाचिं
तितंजंस्त्रवासफलीकरोति तरसानंतंसमस्तंनृणाम् ६ वामेपुस्तकधारिणीमभयदास्ता
दक्षजेंदक्षिणेभक्तेभ्योवरदानपेशलकराकर्पूरकुंदोज्ज्वला उज्जृंभांवुजपत्रकांतिन
यनस्निग्धप्रभालोकिनीयेत्वामंवनशीलयंतिमनसातेषांकवित्वंकुतः ७ येषांपांडुर
पुंडरीकपटलस्पष्टाभिरामप्रभां सिंचंतीममृतद्रवैरिवशिरोध्यायंति मूर्ध्निस्थिताम् स्वाश्रा
तं विकटस्फुटाक्षरपदा निर्यांति वक्त्रांबुजा तेषांभारतिभारतीसुरसरित्कल्लोललोला
मियः ८ येस्विंदूरपरागपुंजपिहितां त्वत्तेजसा धाम्यमिमां मुर्वीचापिविलीनयावकरस
प्रस्तारमग्नामिव पश्यंतिक्षणमप्यनन्यमनसस्तेषांमनंगज्वराक्लांतास्तत्रकुरंगपूर्ण
वकहृष्टेणावश्यभवंतिस्फुटं ९ चंचत्कांचनकुंडलांगदधरामाबद्धकांचीस्रजं येत्वां
चेतसितद्गतेक्षणमपिध्यायंतिकृत्वास्थिरां तेषांवेश्मनिविभ्रमादहरहः स्फारीभव
त्यश्चिरंमाद्यत्कुंजरकर्णतालतरलास्थैर्यंभजंतेश्रियः १० आर्भट्यापृथिवीमंडल
नेत्राज्जटांत्सुदृशांजवधूकप्रसवारुणां वरधरांप्रेतासनाध्यासिनी त्वांध्यायंतिचतु
र्भुजांत्रिनयनामापीनतुंगस्तनी मध्येनिम्नवलित्रयांकितनवंत्वद्रूपसंवित्तये ११ जातो

ल: प्पत्यपरिकुदेह्निस्थितिभुजां सामान्यमात्रे कुले निःशेषावनिचक्रवर्त्तिपदवीं लब्ध्वा प्रतापोन्नतिः यद्विद्या
१६ धरवृन्दवंदितपदः श्रीवत्सराजोभवद्देवित्वच्चरणांबुजप्रणतिजः सोयंप्रसादोदयः १२ चंडित्वच्चर
णांबुजार्चनकृते बिल्वीदलोल्लुंठनात्रुट्यत्कंटककोटिभिः परिचयंयेषां न जग्मुः कराः तेदंडां
कुशाचक्रचापकुलिशश्रीवत्समत्स्यांकितैः जायंते पृथिवीभुजा कथमिमाभोजप्रभेः पाणि
भिः १३ विप्रः क्षोणिभुजोविशस्तदितरे क्षीराज्यमध्वासवैस्त्वांदेवि त्रिपुरेपरापरकलां संतर्प्य पू
जाविधौ यांयांप्रार्थयतेमनःस्थिरतया तेषां तदेवध्रुवं तांतां सिद्धिमवाप्नुवंति तरसा विघ्नैर
विहीनानराः १४ शब्दानां जननीत्वमत्रभुवनेवाग्वादिनीत्युच्यसेत्वत्तः केशववासवप्रभृतयो
प्याविर्भवंति ध्रुवं लीयंते खलुयत्रकल्पविरमेब्रह्मादयस्तेप्यमी सात्वंकाचिदचिंत्यरूपमहि
माशक्तिःपरागीयसे १५ देवानांत्रितयंत्रयीहुतभुजांशक्तित्रयंत्रिस्वराः त्रैलोक्यंत्रिपदीत्रिपु
ष्करमथोत्रिब्रह्मवर्णास्त्रयः यत्किंचिज्जगतित्रिधानियमितंवस्तुत्रिवर्गात्मकं तत्सर्वंत्रि
पुरेतिनामभगवत्यन्वेतितेतत्वतः १६ लक्ष्मींराजकुलेजयांरणमुखेक्षेमंकरीमध्वनि क्र
व्यादद्विपसर्पभाजिशवरीं कांतारदुर्गेगिरौ भूतप्रेतपिशाचजंबकभयेस्मृत्वामहाभै
रवीं व्यामोहेत्रिपुरांतरंतिविपदस्तारांचतोयप्लवे १७ मायाकुंडलिनीक्रियामधुमतीका
लीकलामालिनी मातंगीविजयाजयाभगवती देवी शिवाशांभवी शक्तिःशंकरवल्लभात्रि
नयनीवाग्वादिनीभैरवीह्रींकारीत्रिपुरापरापरमयीमाताकुमारीत्यसि १८ आईपल्लवि
तैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः काद्यैः क्षांतगतैः स्वरादिभिरथक्षांतैश्चतैः सस्वरैः
नामानित्रिपुरेभवंतिखलुयान्यत्यंतगुह्यानि ते तेभ्योभैरवपत्निविंशतिसहस्रेभ्यः परे

स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदं मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्य
र्थेस्मिन्पुरमथन बुद्धिर्व्यवसिता ३ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु व्यस्तं तिसृ
षु गुणभिन्नासु तनुषु अभव्यानामस्मिन्वरद रमणीयामरमणीं विहंतुं व्याक्रोशीं विदधत इहै
के जडधियः ४ किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति कि
मुपादान इति च अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोयं कांश्चिन्मुखरयति
मोहाय जगतः ५ अजन्मानो लोकाः किमवयववंतोपि जगतामधिष्ठातारं किं भवविधि
रनादृत्य भवति अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मंदास्त्वां प्रत्यमरवर सं
शेरत इमे ६ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः
पथ्यमिति च रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वम
सि पयसामर्णव इव ७ महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव
वरद तंत्रोपकरणं सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृ
ष्णा भ्रमयति ८ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्त
विषये समस्तेप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृ
ष्टा मुखरता ९ तवैश्वर्यं यत्नाद्यदुपरि विरिंचो हरिरधः परिच्छेत्तुं यातावनलमनल
स्कंधवपुषः ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किम
नुवृत्तिर्न फलति १० अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहू

म- नभृत्तरणकंडूपरिवशान् शिरःपद्मश्रेणीरचितचरणांभोरुहवलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जि
१८ तमिदं ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः अल
भ्या पाताले प्यलसचलितांगुष्टशिरसि प्रतिष्टा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः १२ यदृद्धिं सु
त्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे वाणः परिजनविधेयस्त्रिभुवनं नतच्चित्रं तस्मिन्वरिव
सितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः १३ अकाण्डब्रह्मांडक्षयचकित
देवासुरकृपाविधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः सकल्माषः कंठे तव न कुरुते न
श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यसनिनः १४ असिद्धार्था नैव क्वचिदपि सदेवा
सुरनरे निवर्तंते नित्यं जगति जयिनो यस्य विशिखाः स पश्यन्नीश त्वामितरसुरसाधारणम
भूत्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः १५ मही पादाघाताद्व्रजति सहसा संशयपद
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जग
द्रक्षायै त्वं नटसि ननु वामैव विभुता १६ वियद्व्यापी तारागणगुणितफे[illegible]द्गमरुचिः प्र
वाहो वारां यः पृषतलघुदृष्टः शिरसि ते जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनै
वोन्नेयं धृतमहिम दिव्यं तव वपुः १७ रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे चं
द्रार्कौ रथचरणपाणिः शर इति दिधक्षोस्ते कोयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीड
न्त्यो न खलु परतंत्राः प्रभुधियः १८ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने त
स्मिन्निजमुदहरन्नेत्रकमलं गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां र
क्षायै त्रिपुरहर जागर्ति जगतां १९ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म
प्रध्वस्तं फलति पुरुषाराधनमृते अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं

भिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः क
ति कति न गीर्वाणगणिकाः १८ मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते म
न्मथकलां स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां १९ कि
रंतीमंगेभ्यः किरणनिकुरंबामृतरसं हृदि त्वामाधत्ते हिमगिरिशिलामूर्तिमिव यः स सर्पाणां दर्पं शम
यति शकुंताधिप इव ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधाधारसिरया २० तडिल्लेखातन्वीं तपनशशिवैश्वा
नरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलां ॥ महापद्माटव्यां मृदितमलमायेन मनसा म
हांतः पश्यंतो दधति परमाह्लादलहरीं २१ भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वांछ
न्कथयति भवानि त्वमिति यः तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुंदब्रह्मेंद्रस्फुटमुकुटनीरा
जितपदां २२ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्धं शंभोरपरमपि शंके हृतमभूत् य
देतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटं २३ जगत्सू
ते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति सदापूर्वः सर्वं तदिदमनु
गृह्णाति च शिवस्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः २४ त्रयाणां देवानां त्रिगुणजनितानां
त्रिनयने भवेत्पूजा पूजा तव चरणयोर्या विरचिता तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः २५ विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनं वितंद्री माहेंद्री विततिरपि संमीलितदृशा म
हासंहारेस्मिन्विहरति सति त्वत्पतिरसौ २६ जपो जल्पः शिल्पं सकलमपि मुद्राविरच
ना गतिः प्रादक्षिण्यभ्रमणमशनाद्याहुतिविधिः प्रणामः संवेशः सुखमखिलमात्मार्पणदृ

सौ॰
२१

णदृशा सपर्यापर्यायस्तव भवतु यन्मे विलसितं २७ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं विपद्य
न्ते विश्वे विधिशतमखाद्या दिविषदः करालं यत्क्ष्वेडं कवलितवतः कालकलना न शंभोस्तन्मूलं
तव जननि ताटंकमहिमा २८ ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशी ममंदं सौंदर्यस्तवक
मकरंदं विकिरती तवास्मिन्मंदारस्तवकसुभगे यातु चरणे निमज्जन्मज्जीवः करणचरणैः षट्
चरणतां २९ किरीटं वैरिंचं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जंभारिमु
कुटं प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ३० चतुःष
ष्ट्या तंत्रैः सकलमतिसंधाय भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः पुनस्त्वन्निर्बंधाद
खिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदं ३१ शिवः शक्तिः कामः क्षितिरथर
विः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः अमी हृल्लेखाभिस्तिसृभिरवसानेषु घ
टिता भजंते वर्णास्ते तव जननि नामावयवतां ३२ स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो
र्निधायैके नित्ये निरवधिमहाभोगरसिकाः जपंति त्वां चिंतामणिगुणनिबद्धाक्षवलयाः शिवा
ग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैः ३३ शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं तवात्मा
नं मन्ये भगवति भवात्मानमनघं अतः शेषः शेषीत्ययमुभयसाधारणतया स्थितः संबंधो
वां समरसपरानंदपरयोः ३४ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्व
यि परिणतायां न हि परं त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानंदाकारं शि
वयुवतिभावेन बिभृषे ३५ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिमि
लितपार्श्वं परचिता यमाराध्य भक्त्या रविशशिशुचीनामविषये निरालोकेलोका

निवसतिहिभालोकभुवने ३६ विशुद्धौतेशुद्धस्फटिकविशदंव्योमजनकंशिवंसेवेदेवीमपिशि
वसमानव्यवसितां ययोःकांत्यायांत्याःशशिकिरणसारूप्यसरणेर्विधूतांतर्ध्वांताविलसतिचकोरी
वजगती ३७ समुन्मीलत्संवित्कमलमकरंदैकरसिकंभजेहंसद्वंद्वंकिमपिमहतांमानस
चरं यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्तेदोषाद्गुणमखिलमद्भ्यःपयइव ३८
तडित्वंतंशक्त्यातिमिरपरिपंथिस्फुरणयास्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं तव
श्यामंमेघंकमपिमणिपूरैकशरणंनिषेवेवर्षंतंहरमिहिरतप्तंत्रिभुवनं ३९ तवस्वाधिष्ठाने
हुतवहमधिष्ठायनिरतंतमीडेसंवर्तंजननिमहतींतांचसमयां यदालोकेलोकान्दहति
महतिक्रोधकलिलेदयार्द्राद्दृष्टिस्तेशिशिरमुपचारंरचयति ४० तवाधारेमूलेसहसमय
यालास्यपरयानवात्मानंवंदेनवरसमहाताडवनटं उभाभ्यामेताभ्यामुभयविधिमुद्दि
श्यदयया सनाथाभ्यांजज्ञेजनकजननीमज्जगदिदं ४१ गतैर्माणिक्यत्वंगगनमणि
भिःसांद्रघटितंकिरीटंतेहैमंहिमगिरिसुतेकीर्तयतिकः तन्नीडेयच्छायाच्छुरणशबलंचं
द्रकलिकंधनुःशौनासीरंकिमितिनबध्नातिधिषणां ४२ धुनोतुध्वांतंनस्तुलितदलितेंदी
वरवनंघनस्निग्धश्यामंचिकुरनिकुरुंबंतवशिवे यदीयंसौरभ्यंसहजमुपलब्धुंसुमन
सोवसंत्यस्मिन्मन्येवलमथनवाटीविटपिनां ४३ वहंतीसिंदूरंप्रबलकबरीभारति
मिरंद्विषांवृंदैर्बंदीकृतमिवनवीनार्ककिरणं तनोतुक्षेमंनस्तववदनसौंदर्यलहरी
परीवाहस्रोतःसरणिरिवसीमंतसरणिः ४४ अरालैःस्वाभाव्यादलिकलभसश्री
भिरलकैःपरीतंतेवक्त्रंपरिभवतिपंकेरुहरुचिं दरस्मेरेयस्मिन्दशनरुचिकिंज
ल्करुचिरेसुगंधौमाद्यंतिस्मरमथनचक्षुर्मधुलिहः ४५ ललाटंलावण्यद्युतिवि

सौ
२२

मलमाभाति तव यद्द्वितीयं तन्मन्ये मुकुटशशिखंडस्य शकलं विपर्यासन्यासादुभयमपि संभूय च
मिलितं सुधालेपस्यूतिः परिणमति राकाहिमकरः ४६ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव
सनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्र
कोष्ठे मुष्टौ च स्थगयति निगूढान्तरमिदं ४७ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रिया
मां वामं ते सृजति रजनीनायकमयं तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः समाधत्ते संध्यां दि
वसनिशयोरन्तरचरीं ४८ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधाराधारा
किमपि मधुराभोगवतिका अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यव
हरणयोग्या विजयते ४९ कवीनां संदर्भस्तवकमकरंदैकरसिकं कटाक्षव्याक्षेपभ्र
मरकलभौ कर्णयुगलं अमुंचन्तौ दृष्ट्वा तव नवरसास्वादतरलावसूयासंसर्गादलिक
नयनं किंचिदरुणं ५० शिवे शृंगाराद्रा तदितरजने कुत्सनपरा सरोषा गंगायां गिरिशच
रिते विस्मयवती हराहिभ्यो भीता सरसिरुहसौभाग्यजयिनी सखीषु स्मेरा ते मयि जन
नि दृष्टिः सकरुणा ५१ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तुश्चित्तप्रश
मरसविद्रावणफले इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्म
रशरविलासं कलयतः ५२ विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया विभाति त्व
न्नेत्रत्रितयमिदमीशानदयिते पुनः स्रष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान् रजः
सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिदं ५३ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः नदः शोणो गंगा तपनतनयेति ध्रुव

ममुंत्रयाणांतीर्थानामुपनयसिसंभेदमनघे ५४ तवापर्णेकर्णेजपनयनपैशुन्यच
किताविलीयंतेतोयेनियतमनि(केपाठेकुवलयं)मेषाःशफरिकाः इयंचश्रीर्बद्धच्छद
पुटकपाटंकुवलयंजहातिप्रत्यूषेनिशिचविघटय्यप्रविशति ५५ निमेषोन्मेषाभ्यांप्रल
यमुदयंयातिजगतीतवेत्याहुःसंतोधरणिधरराजन्यतनये त्वदुन्मेषाज्जातंजगदिदम
शेषंप्रलयतःपरित्रातुंशंकेपरिहृतनिमेषास्तवदृशः ५६ दृशाद्राघीयस्यादरदलि
तनीलोत्पलरुचादवीयांसंदीनंस्नपयकृपयामामपिशिवे अनेनायंधन्योभवति
नचतेहानिरियतावनेवाहर्म्येवासमकरनिपातोहिमकरः ५७ अरालंतेपालीयुगल
मगराजन्यतनयेनकेषामाधत्तेकुसुमशरकोदंडकुतुकं तिरश्चीनोयत्रश्रवणपथ
मुल्लंघ्यविलसन्नपांगव्यासंगोदिशतिशरसंधानधिषणां ५८ स्फुरद्गंडाभोगप्रतिफ
लिततांटकयुगलंचतुश्चक्रंमन्येतवमुखमिदंमन्मथरथं यमारुह्यद्रुह्यत्यवनिरथम
म र्केंदुचरणंमहावीरोमारःप्रमथपतयेसज्जितवते ५९ सरस्वत्याःसूक्तीरमृतहरीकौश ल
लहरीःपिबंत्याःशर्वाणिश्रवणचुलुकाभ्यामविरलं चमत्कारश्लाघाचलितशिरसःकुं
डलगणोझणत्कारैस्तारैःप्रतिवचनमाचष्टइवते ६० असौनासावंशस्तुहिनगिरिवं
शध्वजपटित्वदीयोनेदीयःफलतुफलमस्माकमुचितं वहत्यंतर्मुक्ताःशिशि
रकरनिःश्वासगलिताःसमृद्ध्यायत्तासांबहिरपिचमुक्तामणिधरः ६१ प्रकृत्यारक्ता
यास्तवसुदतिदंतच्छदरुचेर्वक्ष्येसादृश्यंजनयतुफलंविद्रुमलता नबिंबंतद्बिंबप्र
तिफलनरागादरुणितंतुलामध्यारोढुंकथमिवविलज्जेतकलया ६२ स्मितज्यो
त्स्नाजालंतववदनचंद्रस्यपिबतांचकोराणामासीदतिरसतयाचंचुजडिमा अः

सौं २३

तस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वच्छंदं निशि निशि भृशं कांजिकधिया ६३ अविश्रां
तं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पच्छाया तव जननि जिह्वा जयति सा यदग्रासीनायाः स्फ
टिकदृषदच्छच्छविमयी सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ६४ रणे जित्वा दैत्यानप
हृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चंडांशुत्रिपुरहरनिर्माल्यविमुखैः विशाखेंद्रोपेंद्रैः शशिश
कलकर्पूरधवला विलुप्यंते मातस्तव वदनतांबूलशकला विपंच्या गायंती विविधमपदानं
पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने त्वदीयैर्माधुर्यैरपलपिततंत्रीकलरवां नि
जां वीणां वाणी निचुलयति चोलेन निभृतं ६६ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते कथंका
रं ब्रूमस्तव चिबुकमौपम्यरहितं ६७ भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती तव ग्रीवा ध
त्ते मुखकमलनालश्रियमियं स्वतः श्वेता कालागुरुबहुलजंबालमलिना मृणाली
लालित्यं वहति यदधो हारलतिका गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाह
व्यानद्धत्रिगुणगुणसंख्याप्रतिभुवः विराजंते नानाविधमधुररागाकरभुवां त्रया
णां ग्रामाणां स्थितिनियमसीमान इव ते ६९ मृणालीमृद्वीनां तव भुजलतानां चतसृ
णां चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः नखेभ्यः संत्रस्यन्प्रथममथनादंधक
रिपोश्चतुर्णां वक्त्राणां सममभयहस्तार्पणधिया ७० नखानामुद्द्योतैर्नवनलिनरागं
विहसतां कराणां ते कांतिं कथय कथयामः कथमुमे कदाचिद्वा साम्यं व्रजतु विपि
यांदं तं कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसदलं ७१ समं देवि स्कंदद्विपव
दनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं यदालोक्याशंकाकुलि

तहृदयोहासजनकः स्वकुंभौहेरंबः परिमृशति हस्तेन झटिति ७२ अमूंतेवक्षोजावमृत
रसमाणिक्यकुतुपौ नसंदेहस्पंदोनगपतिपताके मनसिनः पिबंतौतौयस्मादविदितवधू
संगमरसौ कुमारावद्यापिद्विरदवदनक्रौंचदलनौ ७३ वहत्यंबस्तंबेरमदनुजकुंभप्रकृतिभिः
समारब्धांमुक्तामणिभिरमलांहारलतिकां कुचाभोगोबिंबाधररुचिभिरंतःशबलितांप्रता
पव्यामिश्रांपुरदमयितुःकीर्तिमिवते ७४ कुचौसद्यःस्विद्यत्तटघटितकूर्पासभिदुरौकषं
तौदोर्मूले कनककलशाभौकलयता तवत्राणंभंगादलमिलितविलग्नंतनुभुवात्रिधा
नद्धंदेवित्रिवलिलवलीवल्लिभिरिव ७५ तवस्तन्यंमन्येधरणिधरकन्येहृदयतःपयःपारा
वारःपरिवहतसारस्वतमिव दयावत्यादत्तंद्रविडशिशुरास्वाद्यतवयत्कवीनांप्रौढानाम
जनिकमनीयःकवयिता ७६ हरक्रोधज्वालावलिभिरवलीढेनवपुषागभीरेतेना
भीसरसिकृतसंगोमनसिजः समुत्तस्थौतस्मादचलतनयेधूमलतिकाजनस्तांजानी
तेजननितवरोमावलिरिति ७७ यदेतत्कालिंदीतनुतरतरंगाकृतिशिवेकृशेमध्येकिंचि
ज्जननितवयद्भातिसुधियां विमर्दादन्योन्यंकुचकलशयोरंतरगतं तनूभूतंव्योम
प्रविशदिवनाभीकुहरिणीं ७८ स्थिरोगंगावर्तःस्तनमुकुलरोमावलिलताकलावालं
कुंडंकुसुमशरतेजोहुतभुजः रतेर्लीलागारंकिमपितवनाभीतिगिरिसुतेबिलद्वारं
सिद्धेर्गिरिशनयनानांविजयते ७९ निसर्गक्षीणस्यस्तनतटभरेणक्लमजुषोनमन्मू
र्तेर्नाभौवलिषुशनकैस्त्रुट्यतइव चिरंतेमध्यस्यत्रुटिततटिनीतीरतरुणासमाव।
स्थास्थेम्नोभवतुकुशलंशैलतनये ८० गुरुत्वंविस्तारंक्षितिधरपतिःपार्वतिनि।

ल

सौं. जांनितंबादाच्छिद्य त्वयि हरणरूपेण निदधे अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतिं नितंबप्रा
ग्भारः स्थगयति लघुत्वं नयति च ८१ करींद्राणां शुंडाः कनककदलीकांडपटलीमुभाभ्या
२४ मूरुभ्यामुभयमपि निर्जित्य भवती सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विधिज्ञे
जानुभ्यां विबुधकरिकुंभद्वयमपि ८२ पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते निषंगौ जंघे
ते विषमविशिखो बाढमकृत यदग्रे दृश्यंते दशशरफलाः पादयुगलीनखाग्रच्छद्मानः
सुरमुकुटशाणैकनिशिताः ८३ श्रुतीनां मूर्धानो दधति तव यौ शेखरतया ममाप्येतौ
धे मातः शिरसि दयया धेहि चरणौ ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्ला
क्षालक्ष्मीररुणहरिचूडामणिरुचिः ८४ हिमानीहंतव्यं हिमगिरिनिवासैकचतुरौ निशायां
निद्राणं निशि चरमभागे च विशदौ परं लक्ष्मीपात्रं श्रियमपि सृजंतौ समयिनां सरोजं त्व
त्पादौ जननि जयतश्चित्रमिह किं ८५ नमो वाकं ब्रूमो नयनरमणीयाय पदयोस्त
वास्मै द्वंद्वाय स्फुटरुचिरसालक्तकवते असूयत्यत्यंतं यदभिहननाय स्पृहयते पशूनामी
शानः प्रमदवनकंकेलितरवे ८६ मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं लला
टे भर्तारं चरणकमले ताडयति ते चिरादंतःशल्यं दहनकृतमुन्मीलितवता तुलाको
टिक्वाणैः किलिकिलितमीशानरिपुणा ८७ पदं ते कीर्तीनां प्रपदमपदं देवि विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलां कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ८८ नखैर्नाकस्त्रीणां करकमलसंकोच
शशिभिस्तरूणां दिव्यानां हसत इव ते चंडि चरणौ फलानि स्वःस्थेभ्यः किशलय

करांग्रेणदद्तांदसिद्धेभ्योभद्गांश्रियमणिशामस्नायदद्तौ ८९ कदाकालेमातःकथयकलि
तालक्तिकरसंपिवेयंविद्यार्थीनवचरणनिर्णेजनजलंप्रकृत्यामूकानामपिचकविताः
कारणतयायदाधत्तेवाणीमुखकमलतांबूलरसतां ९० पदन्यासक्रीडापरिचयमि
वारब्धुमनसंस्खलंतस्तेखेलंभवनकलहंसानजहति सुविदेशिक्षांसुभगमणिम
जीररणितछलादाचक्षाणंचरणकमलचारुचरितं ९१ अरालाकेशेषुप्रकृतिश
रलामंदहसितेशिरीषाभाचित्तेदृषदिवकठोराकुचतटे भृशंमध्येतन्वीपृथुरुरसि
जारोहविषयेजगत्रातुंशंभोर्जयतिकरुणाकाचिदरुणा ९२ समानीतःपद्भ्यांमणि
मुकुटतामंबरमणीभयादंतःखंडस्तिमितकिरणश्रेणिमसृण दधातित्वद्वक्त्रप्रति
फलनमश्रांतविकसंनिरातंकंचंद्रान्निजहृदयपंकेरुहमिव ९३ पुरारातेरंतःपु
रमसितत्स्त्वच्चरणयोःसपर्यामर्यादातरलकरणानामसुलभा तथाह्येतेनीताः
शतमखमुखाःसिद्धिमतुलांतवद्वारोपांतस्थितिभिरणिमाद्याभिरमराः ९४
गतास्तेमंचत्वंद्रुहिणहरिरुद्रेश्वरभृतःशिवस्वच्छच्छायाघटितकपटप्रच्छदपटः
त्वदीयानांभासांप्रतिफलनरागारुणतयाशरीरीशृंगारोरसइवदृशांदोग्धिकुतुकं ९५
कलंकःकस्तूरीरजनिकरबिंबंजलमयंकलाभिःकर्पूरैर्मरकतकरंडंनिबि
डितं पुनस्त्वद्भोगेनप्रतिदिनमलंरिक्तकुहरं विधिर्भूयोभूयोनिबिडयतिनू
नंतवकृते ९६ खदेरोज्ञताभिर्वृणिभिरणिमाद्याभिरभितोनिषेवेनित्यंत्वा

महत्मितिसदाभावयतियः किमाश्चर्यंतस्यत्रिनयनसमृद्धिंतृणयतोमहासंवर्ताग्निर्विरच
यतिनीराजनविधिं ९७ समुद्भूतस्थूलस्तनभरमुरस्चारुहसितंकटाक्षेकंदर्पः कुसु
मितकदंवद्युतिवपुः हरस्यत्वद्भ्रांतिंमनसिजनयंतः समतुलाभवत्यायेभक्ताः प
रिणतिरमीषामियमुमे ९८ कलत्रंवैधात्रंकतिकतिभजंतेनकवयः श्रियोदे
व्याः कोवानभवतिपतिः कैरपिधनैः महादेवंहित्वातवसतिसतीनामचरमेकु
चाभ्यामासंगः कुरवकतरोरप्यसुलभः ९९ गिरामाहुर्देवीद्रुहिणगृहिणीमा
गमविदोहरेः पत्नींपद्मांहरसहचरीमद्रितनयां तुरीयाकापित्वंदुरधिगमनिः
सीममहिमामहामायेविश्वंभ्रमयसिपरब्रह्ममहिषि १०० सरस्वत्यालक्ष्म्या
विधिहरिसपत्न्याविहरते रतेःपातिव्रत्यंशिथिलयतिरम्येणवपुषा चिरंजीवन्ने
वक्षपितपशुपाशव्यतिकरः परब्रह्माभिख्यंरसयतिरसंत्वद्भजनवाक् १०१ निधेनि
त्यस्मेरेनिरवधिगुणेनीतिनिपुणेनिराघातज्ञानेनियममपरचित्तैकनिलये नि
यत्यानिर्मुक्तेनिखिलनिगमांतस्तुतिपदेनिरातंकेनित्येनिगमयममापिस्तुति
मिमां १०२ प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः सुधासूतेश्चंद्रोपलजललवै
रर्घ्यरचना स्वकीयैरंभोभिः सलिलनिधिः सौहित्यकरणंत्वदीयाभिर्वाग्भिस्तवज
ननिवाचांस्तुतिरियं १०३ इतिश्रीशंकराचार्यविरचितंसौंदर्यलहरीस्तोत्रंसंपू ल
र्णं ॥ श्रीः ॥ ॥ राम ॥ ॥ शुभं ॥

ॐश्रीरामायनमः ॐअस्यश्रीरामहृदयस्तोत्रमंत्रस्य श्रीरामचंद्रऋषिः अनुष्टुप्छंदः श्रीअखंडगुरु
र्देवता सर्वकामनासिद्ध्यर्थेजपेविनियोगः श्रीपार्वत्युवाच यदिस्मजानातिकुतोविलापः सीताकृ
तेनेनकृतः परेण जानातिनैवंयदिकेनसेव्यः समोपिसर्वैरिहजीवजातैः १ नाहोनरात्रिः सवितु
र्यथाभवेत्प्रकाशरूपाव्यभिचारतःक्वचित् ज्ञानंतथाज्ञानमिदंद्वयंहरेरामेकथंस्यात्स्फुटचिद्घने
विग्रहे २ श्रीमहादेवउवाच अत्रोत्तरंकथयिष्यामिरहस्यमपिदुर्लभं सीतारामहनूमत्संवाद
मोक्षसाधनं ३ पुरारामायणेरामोरावणंदेवकंटकं हत्वारणेरणश्लाघीसपुत्रबलवाहनं ४
सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामोहनुमत्प्रमुखैर्वृतः अभिषिक्तः
परिवृतोवसिष्ठाद्यैर्महात्मभिः सिंहासनेसमासीनः सूर्यकोटिसमप्रभः ६ दृष्ट्वातदाहनूमंतं
प्रांजलिंपुरतःस्थितं कृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिं ७ रामःसीतामुवाचेदंब्रूहि
तत्त्वंहनूमते निष्कल्मषोयंज्ञानस्यपात्रंनोनित्यभक्तिमान् ८ तथेतिजानकीप्राहतत्त्वं
रामस्यनिश्चितं हनुमतेप्रपन्नायसीतालोकविमोहिनी ९ सीताउवाच रामंविद्धिपरंब्रह्म
सच्चिदानंदमद्वयं सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरं १० आनंदंनिर्मलंशांतंनिर्वि
कारंनिरंजनं सर्वव्यापिनमात्मानंस्वप्रकाशमकल्मषं ११ मांविद्धिमूलप्रकृतिंसर्गस्थित्यंत
कारिणीं तस्यसंनिधिमात्रेणसृजामीदमतंद्रिता १२ तत्सांनिध्यान्मयासृष्टंतस्मिन्नारोप्यते
बुधैः अयोध्यानगरेजन्मरघुवंशेतिनिर्मले १३ विश्वामित्रसहायत्वंमखसंरक्षणं
ततः अहल्याशापशमनंचापभंगोमहेश्वरः १४ मत्पाणिग्रहणंपश्चाद्भार्गवस्यमद
क्षयः अयोध्यानगरेवासोमयाद्वादशवार्षिकं १५ दंडकारण्यगमनंविराधवधएवच

गयामारीचमरणंमायासीताहृतिस्तथा १६ जटायुषोमोक्षलाभःकबंधस्यतथैवच शबर्यापूज
नंपश्चात्सुग्रीवेणसमागमः १७ वालिनश्चवधःपश्चात्सीतान्वेषणमेवच सेतुबंधश्चजलधौ
लंकायाश्चनिरोधनं १८ रावणस्यवधोयुद्धेसपुत्रस्यदुरात्मनः विभीषणेराज्यदानंपुष्पके
णमयासह १९ अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनं एवमादीनिकर्माणिमयैवच
रितान्यपि आरोपयंतिरामेस्मिन्निर्विकारेखिलात्मनि रामोनगच्छतिनतिष्ठतिनानुशो
चेन्नकांक्षतित्यजतिनकरोतिकिंचित् समोराजीवलोचनः आनंदमूर्तिरचलःसच्चिदानं
दविग्रहः परिणामहीनोमायागुणाननुगतोहितथाविभाति २१ श्रीमहादेवउवाच ततोरा
मःस्वयंप्राहहनूमंतमुपस्थितं शृणुतत्त्वंप्रवक्ष्यामिह्यात्मनात्मपरात्मनां २२ आकाश
स्ययथाभेदस्त्रिविधोदृश्यतेमहान् जलाशयेमहाकाशस्तदवच्छिन्नएवहि २३ प्रति
बिंबाख्यमपरंदृश्यतेत्रिविधंनभः बुद्ध्यवच्छिन्नचैतन्यमेकंपूर्णमथापरं २४ आभासस्त्वप
रंबिंबभूतमेवंत्रिधाचितिः साभासबुद्धेःकर्तृत्वमविच्छिन्नेविकारिणि २५ साक्षिण्यारोप्यते
भ्रांत्याजीवत्वंचतथाबुधैः आभासस्तुमृषाबुद्धिरविद्याकार्यमुच्यते २६ अविच्छिन्नंतुतद्ब्रह्म
विच्छेदस्तुविकल्पतः अविच्छिन्नस्यपूर्णेनएकत्वंप्रतिपद्यते २७ तत्त्वमस्यादिवाक्यैश्चाभा
सस्याहमस्तथा ऐक्यज्ञानंयदोत्पन्नंमहावाक्येनचात्मनः २८ तदाविद्यास्वकार्यैश्च
नश्यत्येवनसंशयः एतद्विज्ञायमद्भक्तोमद्भावायोपपद्यते २९ मद्भक्तिविमुखानां
शास्त्रगर्तेषुमुह्यतां नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि ३० इदंरहस्यंहृद

यंममात्मनोमयैवसाक्षात्कथितंत्वानघ मद्भक्तिहीनायशठाय नत्वयादातव्यमैंद्रा
दपिराज्यतोधिकं ३१ श्रीमहादेवउवाच एतत्तेभिहितं देवि श्रीरामहृदयंमया अति
गुह्यतमंहृद्यंपवित्रंपापशोधनं ३२ साक्षाद्रामेणकथितं सर्ववेदांतसंग्रहं यः
पठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ३३ ब्रह्महत्यादिपापानिबहुजन्मा
र्जितान्यपि नश्यंत्येवनसंदेहोरामस्यवचनंयथा ३४ जातिभ्रष्टोतिपा
पीपरधनपरदारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नोमातापितृवधनिरतोयो
गिवृंदापकारी यःसंपूज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्या योगी
द्रैरप्यलभ्यंपदमखिलमतोस्तदेवैश्वरूपः ३५ इतिश्रीअध्यात्मरा
मायणेउमामहेश्वरसंवादेरामहृदयंसमाप्तं॥ रामायनमः ॥ श्री॥
ॐनमोभवान्यैनमः ॐअकुलकुलमनंतीचक्रमध्येस्फुरंती मधुरसमधुपिबंतीकण्ठ
कोभद्रायंती दुरितमपहरंतीसाधकानोषयंती जयतिजगदेवीश्रीस्वदाक्रीडयं
ती चतुर्भुजामेकवक्त्रांशरदिंदुवदनप्रभाम् खड्गशक्तिधरांदेवींवरदाभयपाणिकाम्
प्रेतस्थामहारौद्रींभुजंगेनोपवीतिनीम् भवानीकालसंहारवहमुद्राविभू
षिताम् जगत्स्थितिकरीब्रह्मविष्णुरुद्रादिभिःसुरैः स्तुतानांपरमेशानींनौमिस्
विभूतिकारिणीम् ॐनमोभवान्यै कैलासशिखरेरम्येदेवदेवंमहेश्वरं ध्यानोप
रतमासीनंप्रसन्नमुखपंकजम् सुरासुरशिरोरत्नरंजितांघ्रियुगंप्रभुम् प्र

प्रणम्य शिरसा नन्दी बद्धांजलिरभाषत श्रीनन्दिकेश्वर उवाच देवदेव जगन्नाथ संशयोस्ति महा
भ मम रहस्यमेकमिच्छामि प्रष्टुं त्वां भक्तवत्सल देवता या त्वया कस्मात् ध्यायते दिवानिश
२७ म् पद्मनेत्र चिरं नाथ तत्तः किमपरः परः इति पृष्टस्तदा देवो नन्दिकेन जगद्गुरुः प्रोवाच भग
वानेकाविकसन्नेत्रपंकजः श्रीभगवानुवाच साधु साधु गणश्रेष्ठ पृष्टवानसि मां वयत
स्कात्तदस्यापि च यद्गोप्यं रहस्यं कथयामि ते पुरा कल्पद्वये लोकाश्चासन्मूढचेतनः
गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता तस्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभिः चेत
नेति ततः शक्तिर्मां काप्यालिंग्य तस्थुषी हेतुः संकल्पजालस्य मनोधिष्ठात्रिनी प्रभा
स्केति परमा शक्तिरुन्मीलनतः परम् ततो वागिति विख्याता शक्तिः शब्दमयी पुरा
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ब्राह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा
सिद्धिदा बुद्धिदा शान्ता सर्वमंगलदायिनी तयैतत्सृज्यते विश्वमनाधारं च धार्यते तयै
तत्पाल्यते सर्वं तस्यामेव प्रलीयते अर्चिता प्रणता ध्याता सर्वभावविनिश्चितैः आ
राधिता स्तुता सैव सर्वसिद्धिप्रदायिनी तस्मात्तदनुग्रहाद्देवतामेव स्तुतवानहम् स
हस्रैर्नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः स्तवेनानेन संतुष्टा मामेव प्रविवेश सा त
दारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमम् तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् स
सुरासुरगन्धर्वयक्षराक्षसमानवम् सपन्नगं ससमुद्रं सशैलवनकाननम्
सग्रहर्क्षराशिनक्षत्रं पंचभूतगणान्वितम् नन्दिनामसहस्रेण स्तवेनानेन स
र्वदा स्तवे परां परां शक्तिं ममानुग्रहकारिणीम् इत्युक्त्वोपरतं देवं चराचर

गुरुंविभुम् प्रणम्यशिरसानन्दीप्रोवाचपरमेश्वरम् श्रीनन्दिकेश्वरउवाच। भगवन्देवदेवे
श लोकनाथजगत्पते भक्तोस्मितवदासोस्मिप्रसादःक्रियतांमयि देव्याःस्तवमिमंपु
ण्यं दुर्लभंयत्सुरैरपि श्रोतुमिच्छाम्यहंदेवप्रभावमपिचास्यतु श्रीभगवानुवाच शृ
णु नन्दिन्महाभागस्तवराजमिमंशुभम् सहस्रैर्नामभिर्दिव्यैःसिद्धिदंसुखमोक्षदम्
शुचिभिःप्रातरुत्थायपठितव्यंसमाहितैः त्रिकालंश्रद्धयायुक्तैःनातःपरतरःस्तवः
अस्यश्रीभवानीनामसहस्रस्तवराजस्य श्रीमहादेवऋषिः अनुष्टुप्छंदः श्रीदे
वीप्रीत्यर्थेजपेपाठेविनियोगः अथध्यानम् ॐअर्धेन्दुमौलिममलाममराभिवंद्या
मंभोजपाशसृणिरक्तकपालहस्ताम् रक्ताङ्गरागरशनाभरणांत्रिनेत्रांध्याये
च्छिवस्यवनितांमदविह्वलाङ्गीम् श्रीईश्वरउवाच ॐमहाविद्याजगन्मातामहाल
क्ष्मीःशिवप्रिया विष्णुमायाशुभाशांतासिद्धासिद्धसरस्वती क्षमाकांतिःप्रभाज्यो
त्स्नापार्वतीसर्वमंगला हिंगुलाचंडिकादान्तापद्मालक्ष्मीर्हरिप्रिया त्रिपुरानन्दिनी
नन्दासुनन्दासुरवन्दिता यज्ञविद्यामहामायावेदमातास्वधाधृतिः प्रीतिःप्र
थाप्रसिद्धाचमृडानीविन्ध्यवासिनी सिद्धविद्यामहाशक्तिःपृथ्वीनारदसेविता पुरुहू
तप्रियाकान्ताकामिनीपद्मलोचना प्रह्लादिनीमहामातादुर्गादुर्गतिनाशिनी
ज्वालामुखीसुगोत्राचज्योतिःकुमुदवासिनी दुर्गमादुर्लभाविद्यास्वर्गतिः
पुरवासिनी अपर्णाशाम्बरीमायामदिरामृदुहासिनी कुलवागीश्वरी

भ· २८ नित्यानित्यक्लिन्नाकृशोदरी कामेश्वरीचनीलाचभेरुंडावह्निवासिनी लंबोदरीमहाकाली
विद्याविद्येश्वरीतथा नरेश्वरीचसत्याचसर्वसौभाग्यवर्धिनी संकर्षिणीनारसिंहीवैष्ण
वीचमहोदरी कात्यायिनीचचंपाचसर्वसंपत्तिकारिणी नारायणीमहानिद्रायोगनि
द्राप्रभावती प्रज्ञापारमिताप्रज्ञातारामधुमतीमधु क्षीराणिवसुधाहूराकालिकासिंह ६
वाहना ॐकारावस्वधाकाराचेतनाकोपनाकृतिः अर्धबिंदुधराधीरः विश्वमाताक
लावती पद्मावतीसुवस्त्राचप्रबुद्धाचसरस्वती कुंडासीनाजगद्धात्रीबुद्धमाताजिनेश्व
री जिनमाताजिनेंद्राचशारदाहंसवाहना राज्यलक्ष्मीवषट्कारास्वधाकारासुधान्वि
का राजनीतिस्त्रयीवार्तादंडनीतिःक्रियावती सद्भूतिस्तारिणीश्रद्धासद्गतिःसत्यप
रायणा सिंधुर्मंदाकिनीगंगायमुनाचसरस्वती गोदावरीविपाशाचकावेरीचशत
द्रुदा सरयूःचंद्रभागाचकौशिकीगंडकीशुचिः नर्मदाकर्मनाशाचचर्मण्वत्यप
देविका वेत्रवतीवितस्ताचवरदानरवाहना सतीपतिव्रतासाध्वीसुचक्षुःकुंडवासि
नी एकचक्षुःसहस्राक्षीसुश्रोणिर्भगमालिनी सेनाश्रोणिपताकाचसव्यूहाय
द्धकांक्षिणी पताकिनीदयारंभाविपंचीपंचमप्रिया परापरकलाकांतात्रिशक्ति
र्मोक्षदायिनी ऐंद्रीमाहेश्वरीब्राह्मीकौमारीकुलवासिनी इच्छाभगवतीशक्तिः
कामधेनुःकृपावती वज्रायुधावज्रहस्ताचंडीचंडपराक्रमा गौरीसुवर्णवर्णा
चस्थितिसंहारकारिणी एकानेकामहेज्याचशतबाहुर्महाभुजा भुजंगभूष

णाभूषा षट्चक्रक्रमवासिनी षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता सुस्मिता सु
मुखी क्षामा मूलप्रकृतिरीश्वरी प्रज्ञा च वर्णा वर्णाश्च पुरुषार्थप्रवर्तिनी रक्ता नीला सिता श्या
मा कृष्णा पीता च कर्बुरा क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया कला काष्ठा मुहूर्ता च नि
मेषा कालरूपिणी सुवर्णरसना नासा चक्षुः स्पर्शवती रसा गन्धप्रिया सुगन्धा च सुस्पर्शा
च मनोगतिः मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी पद्मयोनिः सुकेशी च सुलिंगा भगरूपि
णी योनिमुद्रा महामुद्रा खेचरी खगगामिनी मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता मा
तंगी शुकहस्ता च पुष्पबाणेक्षुचापिणी रक्ताम्बरधरा क्षीवा रक्तपुष्पावतंसिनी शुभ्राम्बरधरा
धीरा महाश्वेता वसुप्रिया सुवेणी पद्महस्ता च मुक्ताहारविभूषणा कर्पूरामोदनिश्वासा
पद्मिनी पद्ममन्दिरा खड्गिनी चक्रहस्ता च त्रिशूलवरधारिणी चापिणी पाशहस्ता च भु
शुंडी परिघायुधा सबाणा शक्तिहस्ता च मयूरवरवाहना वराभयधरा वीरा वीरपानमदो
त्कटा वसुधा वसुधारा च जया शाकंबरी शिवा विजया च जयन्ती च सुस्तनी शत्रुनाशिनी अं
तर्वत्नी वेदशक्तिर्वरदा वरदायिनी शीतला च सुशीला च बालग्रहविनाशिनी कुमारी
च सुपर्वा च कामाख्या कामवन्दिता ज्वालन्धरधरानन्ता कामरूपनिवासिनी कामबी
जवती सत्या सत्यधर्मपरायणा स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिः प्रबोधिनी ष
ट्कोणा च त्रिकोणा त्रिनेत्रा त्रिपुरसुन्दरी वृषप्रिया वृषारूढा महिषासुरघातिनी
शुम्भदर्पहरा दीप्ता दीप्तपावकसन्निभा कपालभूषणा काली कपालमालधारिणी कपा
लकुंडला दीर्घा शिवदूती च घनध्वनिः सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी कंबु

ध. ग्रीवावस्तुमती कुण्डकुण्डा या कुण्डालया जगद्गर्भा कुण्डलिनी भुजगाकारशालिनी प्रोल्लसत्सप्तपद्मा
२५ चनाभिनालमृणालिनी मूलाधारा निराकारा वह्निकुण्डकृतालया वायुकुण्डसुखासीना निरा
धारा निराश्रया श्वासोच्छ्वासगति जीवा ग्राहिणी वह्निसंश्रया वल्लीतन्तुसमुत्थाना षड्रसास्वा
दुलोलुपा तपस्विनी तपःसिद्धि तपसः सिद्धिदायिनी तपोनिष्ठा तपोयुक्ता तापसी च तपः
प्रिया सप्तधातुमयी मूर्तिः सप्तधान्तराश्रया देहपुष्टिर्मनःपुष्टिरन्नपुष्टिर्बलोद्धता ओष
धि वैद्यमाता च द्रव्यशक्तिः प्रभावती वैद्या वैद्य चिकित्सा च सुपथ्या रोगनाशिनी मृ
गया मृगमांसादा मृगत्वङ्मृगलोचना वागुरा बन्धरूपा च बन्धरूपा वधोद्धता बन्दीव
दिस्तुता कारा कारा बन्धविमोचिनी शृंखला खलरूपा विघ्नहृद्ढबन्धविमोचिनी अवि
का कालिका चाबालसुन्दरी पादपङ्कजनार्चिता कौलिकी कुलविद्या च सुकुला कुलपूजिता
कालचक्रभ्रमा भ्रान्ता विभ्रमा भ्रमनाशिनी वात्याली मेघमाला च सुवृष्टिः सस्यवर्धिनी
अकारा च इकारा च उकारैकाररूपिणी ह्रींकारी बीजरूपा च क्लींकाराम्बरवासिनी
सर्वाक्षरमयी शक्तिरक्षरा वर्णमालिनी सिन्दूरारुणवर्णा च सिन्दूरतिलकप्रिया वश्या च वै
श्यबीजा च लोकवश्यविभाविनी नृपवश्या नृपैः सेव्या नृपवश्यकरीप्रिया महिषी नृ
पमान्या च नृमान्या नृपनन्दिनी नृपधर्ममयी धन्या धनधान्यविवर्धिनी चतुर्वर्णमयी
मूर्तिः चतुर्वर्णैः सुपूजिता सर्वधर्ममयी सिद्धिः चतुराश्रमवासिनी ब्राह्मणी क्षत्रि
यी वैश्या शूद्रा च वरवर्णजा वेदमार्गरता यज्ञा वेदविश्वविभाविनी अस्त्रशस्त्र
मयी विद्या वरशस्त्रास्त्रधारिणी सुमेधा सत्यमेधा च भद्रकाल्यपराजिता गाय

ह्रीसत्कृतिः सन्ध्यासावित्रीत्रिपदाश्रया त्रिसन्ध्यात्रिपदीधात्रीसुपर्वासामगायिनी पांचा
लीबालिकाबालाबालक्रीडासनातनी गर्भाधारधराशून्यागर्भाशयनिवासिनी सुरारि
घातिनीकृत्याशुनष्टेनाचतिलोत्तमा लज्जारसवतीनन्दा भवानीपापनाशिनी पट्टांबर
धरागीतिः सुगीतिर्ज्ञानलोचना सप्तस्वरमयीतन्त्रीषड्जमध्यमदैवता मूर्छनाग्रामसं
स्थाचस्वस्थास्वस्थानवासिनी अट्टाट्टहासिनीप्रेताप्रेतासननिवासिनी गीतनृत्यप्रिया
कामातुष्टिदापुष्टिदाक्षया निष्ठासत्यप्रियाप्रज्ञालोकेशीचसुरोत्तमा सविषाज्वालिनी
ज्वालाविषमोहार्त्तिनाशिनी विषारिर्नागदमनी कुरुकुल्लामृतोद्भवा भूतभीतिहरार
क्षाभूतावेशविनाशिनी रक्षोघ्नीराक्षसीरात्रीर्दीर्घनिद्रादिवागतिः चंद्रिकाचंद्रकां
तिश्चसूर्यकांतिर्निशाचरी डाकिनीशाकिनीशिष्याहाकिनीचक्रवाकिनी सितासित
प्रियास्वंगासकलावनदेवता गुरुरूपधरागुर्वीमृत्युर्मारीविशारदा महामारीविनि
द्राचतंद्रामृत्युविनाशिनी चंद्रमंडलसंकाशाचंद्रमंडलवासिनी अणिमादिगुणो
पेतासुस्पृहाकामरूपिणी अष्टसिद्धिप्रदाप्रौढादुष्टदानवघातिनी अनादिनिध
नापुष्टिः चतुर्बाहुश्चतुर्मुखी चतुःसमुद्रशयनाचतुर्वर्गफलप्रदा काशपुष्पवती
काशाशरत्कुमुदलोचना भूताभव्याभविष्याचशैलजाशैलवासिनी वाममार्गर
तावामशिववामांगवासिनी वामाचारप्रियातुष्टिर्लोपामुद्राप्रबोधिनी भूतात्माप
रमात्माचभूतभावविभाविनी मंगलाचसुशीलाचपरमार्थप्रबोधिका दक्षि
णादक्षिणमूर्त्तिः सुदक्षिणाहरिप्रिया योगिनीयोगयुक्ताच योगांगाध्याने

शूलिनी योगपट्टधरा मुक्तिर्मुक्तानां परमा गतिः नारसिंही सुजन्मा च त्रिवर्गफलदायिनी धर्मदा ध
भ० नदा चैव कामदा मोक्षदा कृतिः साक्षिणी क्षणदा दक्षा दक्षजा कोटिरूपिणी क्रतुः कात्यायनी
२० स्वच्छा स्वच्छंदा च कविप्रिया सत्यागमा बहिस्था च काव्यशक्तिः कवित्वदा मेनापुत्री सती मा
ता मैनाकभगिनी तडित् सौदामिनी सुधामा च सुधामा धामशालिनी सौभाग्यदायिनी द्यौश्च सु
भगा द्युतिवर्धिनी श्रीः कृत्तिवसना चैव कंकाली कलिनाशिनी रक्तबीजवधोद्रिक्ता सुतं
तुः बीजसंततिः जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी चामीकररुचिश्चांद्री साक्षाद्याषो
डशी कला यत्तत्पदानुबंधा च यक्षिणी धनदार्चिता चित्रिणी चित्रमाया च विचित्रा भुवने
श्वरी चामुंडा मुंडहस्ता च चंडमुंडवधोद्धुरा अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी अमा
कलशहस्ता च पूर्णकुंभधराधरा अभीरुर्भैरवी भीरा भीमा त्रिपुरसुन्दरी महाचंडा
च रौद्री च महाभैरवपूजिता निर्मुंडहस्तिनी चंडा करालदशनानना कराला विकरा
ला च घोरघर्घरनादिनी रक्तदंतोर्ध्वकेशी च बन्धूककुसुमारुणा कादंबरी पटासा च
काश्मीरी कुंकुमप्रिया क्षांतिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा मातंगिनी वरारोहा मत्त
मातंगगामिनी हंसा हंसगतिर्हंसी हंसोज्ज्वलशिरोरुहा पूर्णचंद्रमुखी श्यामा स्मि
तास्या श्यामकुंडला मषी च लेखनी लेख्या सुलेखा लेखकप्रिया शंखिनी शंखहस्ता च श्री
जलस्था जलदेवता कुरुक्षेत्रावनिः काशी मथुरा कांच्यवंतिका अयोध्या द्वारिका मा
या तीर्था तीर्थकरप्रिया त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी कौशिकी कुशा
वर्ता कौशांबी कोशवर्धिनी कोशदा पद्मकोशाक्षी कुसुमा कुसुमप्रिया तोतला
च तुला कोटिः कोटिस्था कोटराश्रया स्वयंभूश्च सुरूपा च स्वरूपा रूपवर्धिनी ते

जस्विनीस्तुभिद्राच वलदावलदायिनी महाकोशीमहावातोबुद्धिः सदसदात्मिका
महाग्रहस्तरासौम्या विशोकाशोकनाशिनी सात्विकी सूत्वसंस्थाच राजसीच र
जोद्भवा तामसीच तमोयुक्ता गुणत्रय विभाविनी अव्यक्ताव्यक्तरूपाच वेद
विद्याच शांभवी शंकराकल्पिनीकल्पामनःसंकल्पसंततिः सर्वलोकमयी
शक्तिः सर्वश्रवणगोचरा सर्वज्ञानवतीवांछा सर्वतत्त्वाववोधनी जाग्रती
चसुषुप्तिश्चस्वप्नावस्थातुरीयका त्वरामन्दगतिर्मंदामदिरामोदधारिणी
पानभूमिपानपात्रापानदानकरोद्यता आघूर्णारुणनेत्राच किंचिदव्यक्त
भाषिणी आशापूरणीचदीक्षाचदक्षादीक्षितपूजिता नागवल्लीनागकन्या
भोगिनीभोगवल्लभा सर्वशास्त्रवतीविद्यासुस्मृतिर्धर्मवादिनी श्रुतिःश्रु
तिधराज्येष्ठाश्रेष्ठापातालवासिनी मीमांसातर्कविद्याच सुभक्तिर्भ
क्तवत्सला सुनाभिर्यातनाजातिर्गंभीराभाववर्जिता नागपाशधरामूर्त्ति
रगाधानागकुंडला सुचक्राचक्रमध्यस्थाचक्रकोणनिवासिनी सर्वमं
त्रमयीविद्यासर्वमंत्राक्षरावलिः मधुस्रवास्रवंतीचभ्रामरीभ्रमरालकः
मातृमंडलमध्यस्थामातृमंडलवासिनी कुमारजननीक्रूरासुमुखी
ज्वरनाशिनी अतीताविद्यमानाच भाविनीप्रीतमंजरी सर्वसौख्यवती
भक्तिराहारपरिणामिणीनी निदानंपंचभूतानां भवसागरतारिणी
अक्रूराचग्रहवती विग्रहाग्रहवर्जिता रोहिणीभूमिगर्भाचकाल
भूःकालवर्त्तिनी कलंकरहितानारीचतुष्षष्ट्यभिधावती जीर्णा

भ॰ ३१ चजीर्णवस्त्राचनूतनानववल्लभा अराजाश्चरतिः प्रीतिरतिरागविवर्धिनी पंच
वायुगतिर्भिन्ना पंचश्लेष्माशयाधरा पंचपित्तवती पुष्टिः पंचस्थानविबोधिनी
उदक्याचवृषस्यंती वह्निः प्रस्रविनीत्वचम् रजः शुक्रधराशक्तिर्जरायुर्गर्भ
धारिणी त्रिकालज्ञा त्रिलिंगा त्रिमूर्तिस्त्रिपुरवासिनी अरागाशिवतत्वाचका
मतत्वानुरागिणी प्राच्यवाचीप्रतीचीदिगुदीचीदिग्विदिग्दिशः अहंकृतिर
हंकाराबलमायाबलिप्रिया स्रुक्स्रुवासामिधेनीचसुश्रद्धाश्राद्धदेवता
मातामातामहीतृप्तिः पितृमातापितामही स्नुषादौहित्रिणेपुत्रीपौत्री
नप्त्रीशिशुप्रिया स्तनदास्तनदाराचविश्वयोनिःस्तनंधयी शिशूत्संग
धरादोलादोलाक्रीडाभिनंदिनी उर्वशी कदलीकेकाविशिखाशिखिवर
र्तिनी खट्वांगधारिणीखड्गबाणपुंखानुवर्तिनी लक्ष्यप्राप्तिः करा
लक्ष्यालक्ष्याचशुभलक्षणा वर्तिनी सुपथाचारा परिखाचखनिर्वृतिः
प्राकारवलयावेलामर्यादाचमहोदधिः पोषणी शोषणी शक्तिर्दीर्घके
शीसुलोमशा ललितामांसलातन्वी वेदवेदांगधारिणी नरासृक्पानम
त्ताचनरमुंडास्थिभूषणा अक्षक्रीडारतिःशारी शारिकाशुकभाषि
णी शांभरीगारुडीविद्यावारुणीवरुणार्चिता वाराहीमुंडहस्ताचदं
ष्ट्रोद्धृतवसुंधरा मीनमूर्तिर्धरामूर्ता वदान्याप्रतिमाश्रया अमूर्तानि
धिरूपाचशालिग्रामशिलाशुचिः स्मृतिसंस्काररूपाचसुसंस्कारा
चसंस्कृतिः प्राकृतादेशभाषाचगाथागीतिः प्रहेलिका इडाचपिंग

लापिंगा सुषुम्णा सूर्यवाहिनी शशिस्रवा च तालुस्था काकिनी मृतजी
विनी अनुरूपा वृहद्रूपा लकुरूपा गुरुस्थिरा स्थावरा जंगमा देवी कृत
कर्मफलप्रदा विषयाक्रान्तदेहा च निर्विशेषा जितेंद्रिय: विश्वरूपा।
चिदानन्दा परंब्रह्मप्रवोधिनी निर्विकारा च निर्वैरा विरति: सत्यवर्धिनी
पुरुषा ज्ञा च भिन्ना च क्षांति: कैवल्यदायिनी विविक्तसेविनी प्रज्ञा जन
यित्री वहुश्रुति: निरीहा च समस्तैका सर्वलोकैकसेविता सेवा सेव्या प्रिया
सेव्या सेव्याफलविवर्धिनी कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी
प्रत्यंचा च धनुर्यष्टि: खड्गधारा दुरागति: अश्वप्लुतिश्च वल्गा च सृणि:
समत्तवारणा वीरभूर्वीरमाता च वीरसूर्वीरनन्दिनी जयश्रीर्जयदीक्षा
च जयदा जयवर्धिनी सौभाग्यसुभगाकारा सर्वसौभाग्यवर्धिनी क्षे
मंकरी सिद्धिरूपा सत्कीर्ति: पथिदेवता सर्वतीर्थमयी मूर्ति: सर्वदेव
मयी प्रभा सर्वसिद्धिप्रदा शक्ति: सर्वमंगलमंगला पुण्यसहस्र ना
मेदं मया ख्यातं रुद्रभाषितम्‌ चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रकाशितं
नात: परतरं विद्या नात: परतर: स्तुति: नात: परतरो मंत्रस्तीर्थं नात: परं
परं तेधन्य: कृतपुण्यास्ते त एव भुवि पूजिता: एकभाव मुदा नित्यं य
चेयंती महेश्वरीम्‌ देवतानां देवता या ब्रह्मा द्यैर्या च पूजिता भूयात्साव
रदा लोके साधूनां विश्वमंगला एतामेव पुराराध्य विद्यां त्रिपुरसुन्दरीम्‌
त्रैलोक्यमोहनं रूपमकार्षीद्भगवान्हरि: इति श्री रुद्रयामले तंत्रे नन्दिकेश्वरसं
वादे महात्म्य भवानीनामसहस्रस्तवराज: संपूर्णसमाप्त: ॥ श्री